दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-282 | 1 | अगस्त 01, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणकृष्णतृतीया
श्रावण 16 प्रविष्ठांशः मङ्गलमयः भवेत्

2 विरोध-प्रदर्शने आहतानां देहली-आरक्षिणां परिजनैः न्याय-याचना कृता, आरक्षिणां सुरक्षा-संवर्धनाय च प्रशासनं निवेदितम्

3 स्वतन्त्रता-दिवसात् पूर्वं कसौलीक्षेत्रे उच्चसतर्कता, एस.डी.एम. कार्यालयं 'आर्मी- पब्लिक- विद्यालयं' प्रति च संतर्जनापूर्णानि ई-मेलपत्राणि

5 स्वमूलैः अस्मान् संयोजयति कला-संस्कृतिः, तस्याः संरक्षणम् अनिवार्यम्- अधिशासिनी निर्देशिका राजश्री बनर्जी

## राष्ट्रमण्डलक्रीडाः २०२६-: जूडो-स्पर्धायाम् अस्मिता डे, हर्ष सिंह च स्वर्णपदकं जितवन्तौ



ग्लास्गो-नगरे आयोजितायां राष्ट्रमण्डलक्रीडायाः जूडो-स्पर्धायाम् अस्मिता डे, हर्ष सिंह च स्वर्णपदकं जितवन्तौ। ४८ किलोग्रामवर्गस्य स्पर्धायाम् अस्मिता देशाय प्रथमं स्वर्णपदकं प्रापयत्। अपरञ्च, हर्ष सिंहः पुरुषाणां ६० किलोग्रामवर्गे एतत् पदकं प्राप्तवान्। भारतीयमुष्टिधोः (Boxers) प्रीति पवार, जैस्मीन लम्बोरिया, अरुन्धति चौधरी, अङ्कुश पङ्घाल च अन्तिमस्पर्धायां (Final) स्थानं निश्चितवन्तः। प्रीतिः महिलानां ५४ किलोग्रामवर्गस्य उपांतिमस्पर्धायां जाम्बिया-देशस्य कैथरीन म्वापे-वर्यां पराजितवती। जैस्मीन लम्बोरिया ५७ किलोग्रामवर्गे, अरुन्धति चौधरी ७० किलोग्रामवर्गस्य च अन्तिमस्पर्धायां प्रवेशं प्राप्तवत्यौ। तथैव, अङ्कुश पङ्घालः पुरुषाणां ८० किलोग्रामवर्गस्य उपांतिमस्पर्धायां कनाडा-देशस्य जोशुआ ओफोरी-वर्यं पराजितवान्। जादूमणि सिंहः पुरुषाणां ५५ किलोग्रामवर्गे नामीबिया-देशस्य एम हाउसेब-वर्यं पराज्य अन्तिमस्पर्धायां प्रविष्टवान्। भारतेन अधुना यावत् एतस्यां प्रतियोगितायां पञ्च स्वर्णपदकानि, दश रजतपदकानि, चत्वारि कांस्यपदकानि च जितानि सन्ति।

### नीरज चोपडा कुन्तक्षेपणे रजतपदकम्, यशवीर सिंहः च कांस्यपदकं जितवान्



भारतस्य नीरज चोपडा कुन्तक्षेपणे (Javelin Throw) रजतपदकं जितवान्, यदा च यशवीर सिंहः कांस्यपदकं स्वनाम्नि कृतवान्। नीरजः स्वस्य द्वितीयप्रयासे सत्रस्य श्रेष्ठं ८५.८३ मीटर्मितं क्षेपणं कृतवान्। अपरञ्च, यशवीरः अन्तिमप्रयासे व्यक्तिगत-श्रेष्ठं ८५.४१ मीटर्मितं प्रदर्शनं कृत्वा कांस्यपदकं प्राप्नोत्। एतेन पदकेन सह राष्ट्रमण्डलक्रीडायां भारतस्य पदकानां सङ्ख्या वर्धित्वा २३ अभवत्। एतेषु पञ्च स्वर्णपदकानि, द्वादश रजतपदकानि, षट् कांस्यपदकानि च समाविष्टानि सन्ति।

### तेजस्विन शङ्करः डेकाथलान्-स्पर्धायां कांस्यपदकं जितवान्



ग्लासगो-राष्ट्रमण्डलक्रीडायां तेजस्विन शङ्करः इतिहासं रचयित्वा डेकाथलान्-स्पर्धायां कांस्यपदकं जितवान्। एतेन सह सः राष्ट्रमण्डलक्रीडायाः डेकाथलान्-स्पर्धायां पदकं जेता प्रथमः भारतीयः सञ्जातः। तेजस्विनः दिनद्वयं यावत् प्रचलितासु १० स्पर्धासु कुलम् ७,९७६ अङ्कान् प्राप्तवान्। राष्ट्रमण्डलक्रीडायां एतत् तस्य द्वितीयं पदकम् अस्ति। इतः पूर्वं सः २०२२ तमस्य वर्षस्य बर्मिङ्घम-क्रीडायां उच्चकूर्दने (High Jump) कांस्यपदकं जितवान् आसीत्।

### भारतस्य यामिनी मौर्य जूडो-स्पर्धायाः महिला ५७ किलोग्रामवर्गे रजतपदकं जितवती




ग्लासगो-राष्ट्रमण्डलक्रीडायां भारतस्य यामिनी मौर्य जूडो-स्पर्धायाः महिला ५७ किलोग्रामवर्गे रजतपदकं जितवती। अन्तिमस्पर्धायां सा इङ्गलैण्ड-देशस्य असेल्या टोपराक-वर्यायाः सकाशात् कठिने मुकाबले पराजिता अभवत्।

## लोक-सभायाम् 'जन्म-मृत्योः पञ्जीकरणम् संशोधनविधेयकः सर्वसम्मत्या पारितंगतः




एन.ई.एफ.टी. विषयम् अधिकृत्य छात्राणां विरोध-प्रदर्शनावधौ आरक्षि-बलैः कृतं कार्याचरणं समेत्य अन्यान् विषयान् आदाय प्रतिपक्षस्य भीषण-कोलाहलानन्तरं संसदः उभयोः सदनयोः कार्यजातं अद्ययावत् स्थगितम् । प्रथम स्थगनान्तरं यदा मध्याह्ने द्वादश-वादने लोक-सभायाः उपवेशनं पुनः समारब्धम्, तदा पीठासीनः दिलीप-सैकिया 'जन्म-मृत्यु- संशोधन विधेयकम् -२०२६' विचारणार्थम्, पारणार्थञ्च गृहीतवान्। गृह-राज्यमन्त्री नित्यानन्द-रायः प्रतिपक्षस्य कोलाहलाभ्यन्तरे एव विधेयक संसद्-पटले उपस्थापितवान्। एषः विधेयकः चर्चा विनैव कोलाहलाभ्यन्तरे एव सदने पारितः । अत्रान्तरे संसदीय-कार्य-मन्त्री किरेन रिजिजू-महोदयः चर्चायाम् भागं न ग्रहीतु प्रतिपक्षस्य कद्वालोचनाम् अकरोत्। मन्त्री प्रोक्तवान् यत् मया काङ्ग्रेस्-प्रमुख-प्रतिपक्षेभ्यः अस्य गुरुतर-विधेयकस्य विचारणाय पुनः पुनः साग्रहं निवेदितम् आसीत्।

## प्रधानमन्त्रिणः आपत्तिजनक-सामग्री-प्रसारात् 'मेटा-इण्डिया' अधिकारिणां विरुद्धम् हैदराबाद-आरक्षिभिः प्राथमिकी पञ्जीकृता

हैदराबाद-नगरस्य साइबर्-आरक्षिभिः फेसबुक-इन्स्टाग्राम-पटलयोः प्रधानमन्त्रिणः नरेन्द्र-मोदिनः विरुद्धम् आक्षेपार्ह सामग्र्याः प्रसारात् 'मेटा-इण्डिया' अधिकारिणां विरुद्धं प्राथमिकी पञ्जीकृता। भारतीय जनता दलस्य सामाजिक अन्तर्जालीय-विभागस्य परिवादम् आधारिकृत्य एतत) अभवत्। साइबर्-अपराध-विभागस्य आरक्ष्यायुक्तः अरविन्द बाबु-महोदयः अकथयत् यत् प्रकरणस्यास्य गहन-अन्वेषणं प्रचलति। तेलङ्गाना-भाजपा-दलेन उक्तं यत् 'भाषण स्वातन्त्र्यं चरित्र हननस्य अनुज्ञापत्रं न भवितुम् अर्हति' इति ॥

## सुभाषितम्

**पतितोऽपि राहुवदने,**
**तरणिर्बोधयति पद्मखण्डानि।**
**भवति विपद्यपि महताम्**
**अङ्गीकृत वस्तुनिर्वाहः॥**

भावार्थः- महान और सज्जन व्यक्ति विपत्ति के समय पर भी स्वयं अपनी जिम्मेवारी को उसी तरह निभाते हैं जिस तरह ग्रहण के समय राहु द्वारा ग्रस लिए जाने पर भी सूर्य जल में उगे हुए कमल पुष्पों के समूहों को विकसित करने की अपनी जिम्मेवारी पूरी तरह निभाता है।




सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केत- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## जे. पी. एस्. सी. गोप्यताभंग परीक्षा पत्र प्रकरणे सी. बी.आई. अन्वेषणाभियाचना

झारखण्ड्-राज्यस्य भाजपेति-दलस्य-सांसदाः संसदभवनस्य महात्मा गान्धी-प्रतिमायाः पुरतः कथितस्य जे. पी. एस्. सी. गोप्यताभंग परीक्षा पत्र प्रकरणे सी. बी.आई. अन्वेषणं याचितवन्तः। झारखण्ड्-राज्ये जे. एम्. एम्-नेतृत्वस्य सर्वकारस्य नेतृत्वे जे. पी. एस्. सी. अनधिकृत परीक्षा पत्र प्रकाशनेन सहैव अनेकाः परीक्षा पत्र प्रकाश-घटनाः सूचिताः इति केन्द्रीय-महिला-बाल-विकास-मन्त्रिणा तथा कोडरमा-मण्डलस्य भाजपा-सदस्या अन्नपूर्णा देवी इत्यनया आरोपः कृतः।

# लवप्रीत सिंहः रजतपदकं, सीमा कलीरामना च कांस्यपदकं जितवती




ग्लास्गो-नगरे आयोजितायां राष्ट्रमण्डलक्रीडायां भारतीयः भारोत्तोलकः (Weightlifter) लवप्रीत सिंहः पुरुषाणां ११० किलोग्रामवर्गे रजतपदकं जितवान्, यदा च सीमा कलीरामना महिलानां चक्रक्षेपण-स्पर्धायां (Discuss Throw) कांस्यपदकं प्राप्नोत्।

## लवप्रीत सिंहस्य प्रदर्शनम्

लवप्रीतः स्नैच-स्पर्धायां क्रीडायाः क्रीडा-कीर्तिमानं (Games Record) रचितवान्, अल्पेन अन्तरेण च स्वर्णपदकात् वञ्चितः अभवत्। न्युजील्याण्ड-देशस्य डेविड लिटी ३८९ किलोग्रामभारम् उत्तोल्य स्वर्णपदकं जितवान्, यदा च इङ्गलैण्ड-देशस्य एंड्रयू ग्रिफिथ्स ३५६ किलोग्रामभारम् उत्तोल्य कांस्यपदकं प्राप्तवान्।

## महिलानां चक्रक्षेपण-स्पर्धा

महिलानां चक्रक्षेपण-स्पर्धायां सीमा कलीरामना ५८.६५ मीटर्मितं चक्रं क्षिपित्वा कांस्यपदकं जितवती, यदा च तस्याः समदेशीया निधि रानी चतुर्थस्थाने अभवत्। जमैका-देशस्य समंथा हॉल ६१.६६ मीटर्मितस्य श्रेष्ठक्षेपणेन सह स्वर्णपदकं जितवती, यदा च कनाडा-देशस्य जूलिया टंक्स ६०.६७ मीटर्मितस्य क्षेपणेन सह रजतपदकं प्राप्नोत्।

# विरोध-प्रदर्शने आहतानां देहली-आरक्षिणां परिजनैः न्याय-याचना कृता, आरक्षिणां सुरक्षा-संवर्धनाय च प्रशासनं निवेदितम्



दिल्ल्याः जन्तर-मन्तर-क्षेत्रे जुलाई-मासस्य त्रिंशद् दिनाङ्के विरोध-प्रदर्शनावधौ आहतानां दिल्ली-आरक्षि-बलानां परिजनैः नवदिल्ल्यां वार्ताहर-सम्मेलनं आहूतम्। अस्मिन् अवसरे तैः आरोपः कृतः यत् प्रदर्शन-काले आरक्षि-अधिकारिणामुपरि हिंसा कृता। परिजनैः उक्तं यत् अग्रिम पङ्क्तौ नियोजिताः आरक्षिणः जन-समूहे विद्यमानैः उपद्रवि-तत्त्वैः परिवेष्टिताः, प्रस्तर खण्डैः प्रहृताः, कायिक उत्पीडनेन च ताडिताः। अस्मिन् उपद्रवे अनेके आरक्षिणः गम्भीर रूपेण व्रणिताः अभवन्। परिजनैः प्रशासनं प्रति साग्रहं निवेदितम् यत्- अस्मिन् आक्रमणे सल्लग्नानां दोषिणां विरुद्धय कठोर-कार्याचरणं सुनिश्चितं भवेत्, तथा सार्वजनिक-प्रदर्शनेषु नियोजितानां आरक्षिणां सुरक्षा-व्यवस्था सुदृढा क्रियेत। अत्रान्तरे एकस्य सहायक आरक्षकस्य पुत्रेण प्रोक्तं यत् अस्यां हिंसायां तस्य पितुः शिरसि गम्भीरा क्षतिः अभवत्।

## पाक-अधिकृत-जम्मू-काश्मीरे प्रदर्शनकारिणाम् उपरि नृशंस-अत्याचारः सम्वृत्तः, प्रदर्शनकारिणः च निहताः



पाक-अधिकृत-जम्मू-काश्मीर-क्षेत्रेषु अस्य सप्ताहस्य प्रारम्भे पाक-सुरक्षा-बलैः नागरिकाणाम् उपरि अत्याचारस्य अनन्तरम् प्रतिरोध-प्रदर्शनं अश्रान्तं प्रचलति। अस्यां हिंसायां चत्वारिंशतोप्यधिकाः जनाः पंचत्वे विलीनाः। स्थानीय प्रशासनेन मौलिक-अधिकारान् याचमानाः महिला-प्रदर्शनकारिण्यः लक्षीकृताः। अस्य दुराचारस्य विरोधे उच्चैः आक्रन्दन्तीनां रावलाकोट-मीरपुर-क्षेत्रयोः एकत्रितानां महिलानाम् उपरि पाक-सुरक्षा-बलैः गोलिका-प्रहाराः कृताः। सामाजाक-माध्यमेषु प्रसारिताः अनेकाः दृश्य-श्रव्य-सञ्चिकाः दर्शयन्ति यत् 'कोटली' इत्यत्र शान्तिपूर्ण-प्रदर्शनाभियाने आरक्षिणां गोलिका-प्रहारात् महिलाः प्राण-रक्षायै इतस्ततः धावन्ति। नागरिक सङ्घानाम् अवैधीकरणं अभिव्यक्ति-स्वातन्त्र्यस्य अत्यन्तं उल्लङ्घनम् इति संयुक्त राष्ट्र सङ्घस्य मानवाधिकार-प्रवक्ता जेरेमी-लॉरेंस अवोचत्।

# ओडिशा-राज्ये जलप्लावनस्य स्थितिः अद्यापि अतीव गम्भीरा चिन्तास्पदा च वर्तते; त्रयोदश जनपदानां खण्डेषु प्रायः अष्ट-लक्षं जनाः अस्मात् आप्लवात् भृशं प्रभाविताः



भारतीय ऋतु -विज्ञान-विभागेन गुजरात-राज्ये तथा मध्यमहाराष्ट्र अतिवृष्टेः सम्भावनां वीक्ष्य 'रक्त-वर्णीया संचेतना प्रख्यापिता। अद्य अरुणाचल प्रदेशस्य, पूर्व-राजस्थानस्य, कर्नाटकस्य, केरलस्य, माहे क्षेत्रस्य, पञ्जाबस्य, पश्चिम-मध्यप्रदेशस्य च केषुचित् भागेषु अति- वृष्टिः भवितुम् अर्हतीति अवधेयम् । ओडिशा-राज्ये आप्लव-स्थितिः अद्यापि सुगम्भीरा आशङ्कास्पदा च अस्ति। प्रदेशस्य बहुषु क्षेत्रेषु सेतु-विदारणेन नदीनां जलाप्लवेन च लोक-यात्रा सञ्जाताकुला। यद्यपि उपरितन-क्षेत्रेषु वर्षणस्य निवृत्त्या महानदी प्रवाहः क्रमेशः स्थिरतां भजते, तथापि वैतरणी-नद्याः तदुपनदीनाञ्च आप्लावेन नूतनाः आशङ्काः प्रादुर्भूताः। अस्मद्-वार्ताहरस्य वृत्तान्तानुसारम् त्रयोदश जनपदानां खण्डेषु प्रायः अष्ट-लक्षं जनाः अस्मात् आप्लवात् प्रभाविताः अभवन्। प्रशासनस्य अधिकारिणः आपद्-रक्षण-सहायता-कार्याणि निरीक्षणञ्च सम्प्रति तीव्र गत्या सञ्चालयन्ति।

# महिन्द्रा उद्योगेन करानन्तरं ८% लाभः वर्धितः अस्ति



**हिमसंस्कृतवार्ता, रविः खरिडेहालः** । महिन्द्रा उद्योगेन प्रथम त्रैमासिक लाभः ३४% अधिकः अस्ति। वित्तीयवर्षे २०२६-२७ प्रथम त्रैमासिक लाभः ५४५५ कोटिरूप्यकाणि अस्ति ।

२०२५-२६ वित्तवर्षे प्रथम त्रैमासिक लाभः ४०८३ कोटिरूप्यकाणि आसीत् । राजस्वस्य सङ्ख्या ५८,१८८ कोटिरूप्यकाणि अस्ति यत् पूर्ववर्षस्य प्रथमत्रिमासे राजस्वस्य सङ्ख्या ४५,५२९ कोटिरूप्यकाणि आसीत् । राजस्वस्य २८% अधिकं भवति । एताः सङ्ख्याः वाहनस्य, कर्षकवाहनस्य च खण्डस्य कृते सन्ति ।

# दिल्लीः पिङ्क-सहेली-स्मार्ट-कार्ड-पत्रस्य अनिवार्यतायाः समयावधिः सितम्बर-मासस्य १६ दिनाङ्क पर्यन्तं वर्धिता




दिल्ली-सर्वकारेण बस-यानेषु निःशुल्क-यात्रायाः सुविधायै पिङ्क-सहेली-स्मार्ट-कार्ड-पत्रस्य अनिवार्य-उपयोगस्य समयावधिः अग्रिममासस्य १६ दिनाङ्क पर्यन्तं वर्धिता। संशोधित-निर्णयानुसारं, वाहकाः (Conductors) अग्रिममासस्य १५ दिनाङ्क पर्यन्तं पिङ्क-पत्रिकाम् (Pink Tickets) एव दास्यन्ति। दिल्ली-नगरस्य परिवहनमन्त्री डा. पङ्कज कुमार सिंहः अवदत् यत्, एषः निर्णयः स्मार्ट-कार्ड-आधारित-प्रणाल्याम् सुचारुरूपेण परिवर्तनम् आनेतुम् तथा च एतस्य परिवर्तनस्य समये कस्यापि पात्र-यात्रिण्याः असुविधा मा भूत् इति सुनिश्चितं कर्तुम् गृहीतः। सः सर्वान् सम्बद्ध-अधिकारिणः, डिपो-प्रबन्धकान्, क्षेत्रीय-प्रबन्धकान्, वाहकांश्च जन-जागरूकता-अभियानं तीव्रं कर्तुम् तथा च संशोधित-समयावधेः पूर्वम् एव महिला-यात्रिणीः पिङ्क-सहेली-स्मार्ट-कार्ड-पत्रम् प्राप्तुम् साहाय्यं कर्तुम् आदिष्टवान्। डा. सिंहः अधिकारिणः एतदपि सुनिश्चितं कर्तुम् आदिष्टवान् यत् अग्रिममासस्य १५ दिनाङ्क पर्यन्तं वर्तमान-व्यवस्थायाः अन्तर्गतम् कापि महिला-यात्रिणी अनुचितरूपेण निःशुल्क-यात्रायाः वञ्चिता मा भूत्। दिल्ली-सर्वकारेण ज्ञापितं यत् अद्य यावत् आहत्य १७ लक्ष-४ सहस्र-द्विचत्वारिंशत् (१७,०४,०४२) पिङ्क-कार्ड-पात्राणि वितरितानि सन्ति, यत् एतस्याः योजनायाः प्रति महिला-यात्रिणीनाम् उत्साहजनकं प्रतिचारं दर्शयति।

## देहल्याः न्यायालयेन २०२० तमस्य वर्षस्य देहली-दङ्गेषु ताहिर हुसैनाय, अन्येभ्यः चतुर्भ्यः च आजीवन-कारवासस्य दण्डः विहितः

एकेन न्यायालयेन आम-आदमी-पक्षस्य (AAP) पूर्व-पार्षदाय ताहिर हुसैनाय, अन्येभ्यः चतुर्भ्यः च २०२० तमस्य वर्षस्य देहली-दङ्गानाम् अवधौ गुप्तीचार-विभागस्य (IB) अधिकारिणः अङ्कित शर्मा-वर्याणाम् हत्या-प्रकरणे आजीवन-कारवासस्य दण्डः श्रावितः।

# हिमाचले १४ प्रधानाचार्याः उप-निदेशकपदे नियोजिताः, सर्वकारेण प्रसारिताः आदेशाः

**हिमसंस्कृतवार्ताः- शिमला ।**हिमाचलप्रदेशसर्वकारेण विद्यालयीय-शिक्षाविभागे बृहत् प्रशासनिकं परिवर्तनं कुर्वता १४ प्रधानाचार्याः तेषां वर्तमानवेतनमाने शिक्षा-उपनिदेशकस्य ('डिप्टी डायरेक्टर ऑफ एजुकेशन') पदेषु नियोजिताः। शिक्षाविभागस्य सचिवेन राकेशकंवर महोदयेन प्रसारितायाः अधिसूचनायाः अनुसारं सर्वेभ्यः अधिकारिभ्यः सद्यः प्रभावतः नूतनस्थाने कार्यभारं ग्रहीतुं निर्देशः दत्तः। आदेशे स्पष्टीकृतं यत् निर्धारिते समये कार्यभारं न गृह्णताम् नियुक्तिः स्वतः निरस्ता मंस्यते।अधिसूचनायाम् एतदपि उल्लिखितं यत् सर्वाः नियुक्तयः सर्वोच्चन्यायालये विचाराधीनायाः विशेष- अनुमति-याचिकायाः (सिविल) सङ्ख्या २६२७६/२०२४, लेखराज इत्येते अन्ये च विरुद्धं हिमाचलप्रदेशसर्वकारः अन्ये च इत्यस्य अन्तिमनिर्णयस्य अधीनाः स्थास्यन्ति। न्यायालयस्य अन्तिमनिर्णयस्य अनुरूपमेव एतासां नियुक्तीनाम् अग्रेतनी वैधानिकी स्थितिः निर्धारिता भविष्यति।

# स्वतन्त्रता-दिवसात् पूर्वं कसौलीक्षेत्रे उच्चसतर्कता, एस.डी.एम. कार्यालयं 'आर्मी- पब्लिक- विद्यालयं' प्रति च संतर्जनापूर्णानि ई-मेलपत्राणि




**हिमसंस्कृतवार्ताः- सोलनम्** ।स्वतन्त्रतादिवसात् पूर्वं सोलनमण्डलस्य कसौलीक्षेत्रे सुरक्षाव्यवस्थां प्रति सजगता वर्धिता अस्ति। कसौलीस्थिते एस.डी.एम. कार्यालये तथा च 'आर्मी पब्लिक स्कूल' डगशाईं प्रति संतर्जनापूर्णान् ई-मेलसन्देशान् प्राप्य प्रशासनं सुरक्षासंस्थाः च सजगस्थितौ आगताः सन्ति। विषयस्य सूचनां प्राप्य एव आरक्षकविभागेन अन्वेषणं प्रारब्धम्, यदा च साइबरदलं श्व-दलम् (डॉग-स्क्वाड) अपि सक्रियं कृतम् अस्ति। प्राप्तसूचनानुसारं शुक्रवासरे एकेन अज्ञात- ई-मेल आईडी-माध्यमेन प्रेषिते सन्देशे १५ अगस्तकाले सर्वकारीयकार्यालयेषु शिक्षणसंस्थासु च लक्ष्यकरणस्य, राष्ट्र-विरोधिघोषाणां लेखनस्य, भयस्य वातावरणस्य निर्माणस्य च संतर्जना: दत्ताः सन्ति। ई-मेलपत्रे माध्यमैः, अभिभावकैः, विद्यालयप्रबन्धकेन च सह सन्देशप्रापणस्य अपि उल्लेखः कृतः अस्ति। सूत्राणाम् अनुसारं एषः ई-मेलसन्देशः एस.डी.एम. कार्यालय कसौली तथा च 'आर्मी-पब्लिक-स्कूल' डगशाई इत्यनयोः अतिरिच्य अन्येषु केषुचित् ई-मेलसङ्केतेषु अपि प्रेषितः अस्ति। सूचनां प्राप्य एव प्रशासनेन विषयं गम्भीरतया गृहीत्वा आरक्षिसम्बद्धाः सुरक्षा-संस्थाः च ज्ञापिताः।

## अन्वेषणे साइबरदलं संलग्नम् अस्ति-

एस.डी.एम. कसौली महेन्द्रप्रतापसिंहः ज्ञापितवान् यत् संतर्जनापूर्णं ई-मेलपत्रं प्राप्य सद्यः आरक्षिविभागं सूचितम्। आरक्षिविभागेन अभियोगं पञ्जीकृत्य अन्वेषणं प्रारब्धम्। ई-मेलपत्रस्य तान्त्रिकपरीक्षणाय साइबरदलं नियोजितम् अस्ति, यदा च सुरक्षायाः दृष्ट्या श्व-दलम् (डॉग-स्क्वाड') अपि सजगं कृतम् अस्ति। ई-मेल-प्रेषकस्य परिचयं, तस्य वास्तविकी स्थितिः, सन्देशस्य स्रोतस्य च ज्ञानं प्राप्तुम् अङ्कीयसाक्ष्याणां विश्लेषणं क्रियमाणम् अस्ति।

# मानसून-सत्रात् पूर्वं सुक्खू-मन्त्रिमण्डलस्य विस्तारः सम्भवः




**हिमसंस्कृतवार्ताः — शिमला ।** हिमाचल-विधानसभायाः मानसून-सत्रात् पूर्वं राज्य-मन्त्रिमण्डलस्य विस्तारं प्रति राजनैतिकः संक्षोभः तीव्रः संजातः। एतेन सह केषाञ्चन मन्त्रिणां विभागेषु अपि परिवर्तनं भवितुं शक्नोति, यदा च प्रदेश-काङ्ग्रेस-दले काञ्चन नियुक्तयः अपि शीघ्रमेव कर्तुं शक्यन्ते। अस्यामेव श्रृङ्खलायां सत्ता-सङ्घटनाभ्यां सम्बद्धेषु विषयेषु शुक्रवासरे देहली-प्रवासे वर्तमानः मुख्यमन्त्री ठाकुर-सुखविन्दरसिंहसुक्खू प्रदेश-काङ्ग्रेस-अध्यक्षः विनयकुमारश्च अखिल-भारतीय-काङ्ग्रेस-समित्याः सङ्ठन-महासचिवेन के.सी.-वेणुगोपालेन सह मेलनम् अकुरुताम्। सूत्राणाम् अनुसारं अस्मिन् अवसरे सत्ता-सङ्घटनाभ्यां सम्बद्धेषु विषयेषु विस्तारेण चर्चा कृता। तत्रैव कसौली-मध्ये प्रस्तावितस्य 'पॉलिटिकल-अफेयर्स-कमेटी' (PAC) उपवेशनस्य विषये अपि विचार-विमर्शः कृतः। स्मर्तव्यम् अस्ति यत् मुख्यमन्त्री अपि मन्त्रिमण्डल-विस्तारस्य सङ्केतान् दत्तवान् अस्ति। तादृशे अधुना उच्च-नेतृत्वस्य स्वीकृतिः (मोहर) अवशिष्टा अस्ति मन्यते च यत् मानसून-सत्रात् पूर्वं मन्त्रिमण्डले रिक्तं जातम् एकस्य मन्त्रिणः पदं पूरयितुं शक्यते। दृश्येत तर्हि मन्त्रिमण्डल-विस्तारस्य संक्षोभे विधायकस्य सुन्दरठाकुरस्य अपि देहली-प्राप्त्या राजनैतिक-चर्चाभ्यः इतोऽपि बलं प्राप्तम्। मन्त्रि-पदाय विधायकः सुन्दरठाकुरः सञ्चरत्नश्च प्रबल-अधिकारिणौ मन्येते। सूत्राणाम् अनुसारं मन्त्रिमण्डले नूतन-मुखानां समावेशनेन सह-सह केषाञ्चन मन्त्रिणां विभागेषु परिवर्तनस्य अपि सम्भावना प्रकटीक्रियमाणा अस्ति। एतदतिरिच्य विधानसभायाः उपाध्यक्ष-पदे अपि शीघ्रमेव नियुक्तिः भवितुं सम्भावना अस्ति। तत्रैव प्रदेश-काङ्ग्रेस-समित्याम् अपि शीघ्रमेव दल-सचिवः, प्रवक्ता इति पदैः सह अन्येषु केषुचित् पदेषु नियुक्तयः कर्तुं शक्यन्ते। तत्रैव मुख्यमन्त्रिणा सुक्खू-महोदयेन शुक्रवासरे नवदेहल्याः भारत-मण्डपम्-स्थाने आयोजितस्य 'स्पोर्ट्स, फिटनैस एवं इंफ्रास्ट्रक्चर एक्सपो-२०२६' इत्यस्य अवलोकनं कृतम्। अस्मिन् अवसरे प्राविधिक-शिक्षा-मन्त्री राजेशधर्माणी, विधायकः सुन्दरसिंहठाकुरः तथा च सांसदः अनुरागशर्मा अपि मुख्यमन्त्रिणा सह उपस्थिताः आसन्।

# अवशिष्टांश-(एरियर)-सूत्रे हरियाणा-राज्यम् सहमतम्, पञ्जाबस्य विरोधः




**हिमसंस्कृतवार्ताः — शिमला ।** भाखड़ा-ब्यास-प्रबन्धन-मण्डलस्य (BBMB) अवशिष्ट-भुक्ति-सम्बद्धस्य प्रकरणस्य श्रवणं गुरुवासरे सर्वोच्च-न्यायालयस्य भारतस्य मुख्य-न्यायाधीशस्य न्यायमूर्ति-सूर्यकान्तस्य, न्यायमूर्ति-जॉयमाल्य-बागच्याः तथा च न्यायमूर्ति-वी.-मोहनायाः पीठस्य सम्मुखम् अभवत्। श्रवण-काले भारतस्य महान्यायवादिना (Attorney General) केन्द्रसर्वकारेण सम्बद्ध-राज्यैश्च सह बहु-स्तरीय-चर्चायाः परं सज्जीकृतः प्रस्तावः न्यायालयस्य सम्मुखं प्रस्तुतम्। महान्यायवादिना न्यायालयं ज्ञापितं यत् प्रस्तावस्य अन्तर्गतं बी.बी.एम्.बी.-संस्थायाः अवशिष्ट-राशेः भुक्तिः विद्युत्-रूपेण कर्तुं परामर्शः दत्तः अस्ति। तेन उक्तं यत् प्रस्तावं रचयन् सर्वैः सम्बद्ध-पक्षैः विचारः कृतः अस्ति। मुख्य-न्यायाधीशः अस्मिन् सर्वेभ्यः पक्षेभ्यः स्वकीयां सहमतिं दातुं प्रोक्तवान्। हिमाचलप्रदेशः हरियाणा-राज्यं च प्रस्तावे सिद्धान्ततः सहमतिम् अकुरुताम्, यदा च पञ्जाब-राज्येन अस्य विरोधः कृतः। पञ्जाब-पक्षतः तर्कः दत्तः यत् प्रस्तावे हिमाचलप्रदेशस्य उपरि पूँजीगत-व्ययस्य (Capital Cost) तथा च सञ्चालन-संरक्षण-(O&M) शुल्कस्य देयता न समाविष्टा। अतः अस्मिन् पुनः विचारः करणीयः। अस्मिन् मुख्य-न्यायाधीशः पञ्जाब-राज्यम् अवदत् यत् अस्मिन् प्रकरणे डिक्री (Decree) पूर्वमेव हिमाचलप्रदेशस्य पक्षे संजाता अस्ति अस्य च १५ वर्षाणि व्यतीतानि। तादृशे न्यायालये महान्यायवादिनः प्रस्तावस्य प्रवर्तनाय सम्बद्धे स्वकीय-निर्णयस्य ग्रहणाय विचारं करिष्यति। हिमाचलप्रदेशस्य पक्षतः वरिष्ठ-अधिवक्ता कपिलसिब्बलः न्यायालये प्रोक्तवान् यत् यदा पञ्जाब-हरियाणा-राज्यैः स्वयं कदापि भारतसर्वकाराय पूँजीगत-व्ययस्य भुक्तिः न कृता, तर्हि हिमाचलप्रदेशात् तादृशायाः राशेः याचनायाः कश्चिद् औचित्यं नास्ति। तेन एतदपि उक्तं यत् सञ्चालनस्य अन्यानां व्ययानां च महान्यायवादिनः प्रस्तावे पूर्वमेव समावेशः कृतः अस्ति। सर्वेषां पक्षाणां तर्काणि श्रुत्वा सर्वोच्च-न्यायालयः पञ्जाब-राज्यं स्वकीय-दृष्टिकोणे पुनः विचारं कर्तुं निर्दिष्टवान् प्रकरणस्य च अग्रेतनी श्रवण-तिथिः १२ अगस्त २०२६ इति निर्धारिता। उल्लेखनीयम् अस्ति यत् बी.बी.एम्.बी.-एरियर-विषयं किशाऊ-परियोजनया सह योजयन् मुख्यमन्त्रिणा सुक्खू-महोदयेन हरियाणा-सम्मुखं यः समयः स्थापितः आसीत्, हरियाणा-राज्ये तस्य महान् प्रभावः अभवत्।

# हिमाचल-प्रदेशे अगस्त-मासस्य षष्ठ-दिनाङ्क पर्यन्तम् 'येलो-अलर्ट' (Yellow Alert); १२२ मार्गाः, ३१ पेयजल-योजनाः, १९ रूपान्तरकाः (Transformers) च बाधिताः

हिमाचल-प्रदेशे 'ऑरेंज' तथा 'येलो' अलर्ट-मध्ये मानसून-वर्षा पुनरेकवारं तीव्रा अभवत्। प्रदेशस्य बहुषु भागेषु व्यतीतेषु २४ घण्टेषु व्यापिका वर्षा जाता। शुक्रवासरे राजधान्यां शिमला-नगर्यां तथा च काङ्गड़ा-चम्बा-मण्डलस्य अधिकांश-क्षेत्रेषु भारी-वर्षा अभवत्। राज्य-आपातकालीन-सञ्चालन-केन्द्रस्य (State Emergency Operation Centre) नवीनानुसारं भूस्खलनेन वर्षाकारणेन च सम्पूर्ण-प्रदेशे १२२ मार्गाः अवरुद्धाः (बद्धाः) सन्ति। एतेषु मण्डी-कुल्लू-मण्डलयोः सर्वाधिकाः मार्गाः अवरुद्धाः सन्ति। तथैव, १९ विद्युत-रूपान्तरकाः (Transformers) ३१ पेयजल-योजनाः च अपि बाधिताः सन्ति।

# पतञ्जलि-विश्वविद्यालये 'वेदप्रकाशायनम्' ग्रन्थस्य लोकार्पणम्

## स्वामिरामदेव- आचार्यबालकृष्ण- करकमलविमोचितं वेदप्रकाशायनम्



**हिमसंस्कृतवार्ताः- वत्सदेशराजशर्मा, हरिद्वारम्।** पतञ्जलिविश्वविद्यालयस्य पुण्यप्राङ्गणे समागत- विद्वज्जन- साधुसमाज- शोधार्थि- सभ्यसमाकीर्णे सभामण्डपे राष्ट्रपतिसम्मानित- महामहोपाध्याय- प्रो. डॉ. वेदप्रकाशोपाध्याय- महाभागस्य तपःपूत- विद्याविनयसंयुत- जीवनचरितमधुरिम- समुल्लासितं कवीन्द्र- रवीन्द्रमार्कण्डेय- विरचितं 'वेदप्रकाशायनम्' नाम संस्कृतकाव्यग्रन्थं पतञ्जलिविश्वविद्यालयस्य कुलाधिपतिः योगर्षिस्वामिरामदेवमहाभागः तत्रैव कुलपतिराचार्यः डॉ. बालकृष्णमहाभागश्च स्वकरकमलाभ्यां विधिवदुद्वाट्य लोकसमक्षं विमोचयामासतुः। ग्रन्थविमोचनसमये सभागारः साधुविद्वत्समागम- गौरवेण साहित्योत्सव इव बभौ। उपस्थितैः संस्कृतविद्वद्भिः प्राध्यापकैः संशोधकैः विद्यार्थिभिश्च ग्रन्थस्य पदलालित्यं भावगाम्भीर्यं चरित्रचित्रणपाटवं काव्यप्रौढत्वादीनि च मुक्तकण्ठेन प्रशंसितानि। वक्तृभिः प्रो. डॉ. वेदप्रकाशोपाध्याय- महोदयस्य राष्ट्रसेवापरायणता संस्कृतसमुन्नयननिष्ठा गुरुपरम्परापोषणदक्षता वेद- वेदाङ्ग- शास्त्राधिकारादयश्च पौनःपुन्येन स्मारिताः। कवीन्द्र- श्रीरवीन्द्रमार्कण्डेयेन विरचितोऽयं ग्रन्थः केवलं कस्यचिद्विदुषः जीवनवृत्तान्तसंग्रहो नास्ति, अपि तु ज्ञानतपसः संस्कृतसेवायाः भारतीय- विद्यापरम्परायाश्च सजीवप्रतिबिम्बस्वरूपः काव्यमयूखः। अस्मिन् ग्रन्थे महनीयस्य विदुषः व्यक्तित्व- कर्तृत्व- विद्योपासना- लोकसेवा- राष्ट्रनिष्ठा- संस्कृतसमर्पणादीनि च काव्यरमणीयतया सम्यगभिव्यञ्जितानि। समारोहस्य समापनकाले विद्वज्जनैः सर्वसम्मत्याऽभिहितम् यदिदं 'वेदप्रकाशायनम्' संस्कृत- चरितकाव्य- परम्परायामभिनवमुपादेयमादर्शग्रन्थत्वेन प्रतिष्ठां प्राप्स्यति, संस्कृतविद्यार्थिनां संस्कृत- साहित्य- रसिकानां च प्रेरणास्रोतोरूपेण दीर्घकालं यावत् प्रकाशमानमवस्थास्यते।


# कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालये "शास्त्रदीपिका- व्याख्यानमाला" आयोजिता



**हिमसंस्कृतवार्ताः- नागपुरम्।** कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयस्य शास्त्रविद्यागुरुकुलेन गुरुपूर्णिमापर्वणः शुभावसरे "शास्त्रदीपिका- व्याख्यानमाला" आयोजिता। अस्मिन् कार्यक्रमे भारतस्य सुप्रतिष्ठितः विद्वान् वेदमूर्तिः आचार्यः कृष्णशास्त्री आर्वीकर गुरुजी मुख्यातिथिरूपेण समागतः। कार्यक्रमस्य समापनावसरे पूज्येन मुख्यातिथिना विश्वविद्यालयस्य समस्तप्राध्यापकानां सम्मानः कृतः। अद्य विश्वविद्यालये त्रयः कार्यक्रमाः सम्पन्नाः। सर्वप्रथमम् अभिजिन्नक्षत्रे व्यासमहोत्सवनिमित्तं सरस्वतीयज्ञस्य आयोजनम् अभवत्। ततः परं गुरुकुलेन आयोजितस्य सप्तदिवसीय- दीक्षारम्भकार्यक्रमस्य समापनसत्रे शास्त्रविद्यागुरुकुलस्य सञ्चालकः प्रो. हरेकृष्ण- अवस्थीमहोदयः प्रस्ताविकाम् अकरोत्। तदनन्तरं वेदमूर्तेः आचार्यकृष्णशास्त्र्याः आर्वीकर गुरोः प्रेरणाप्रदं व्याख्यानम् अभवत्, यस्मिन् विश्वविद्यालयस्य समस्ताः प्राध्यापकाः, कर्मचारिणः, छात्राश्च सादरम् उपस्थिताः आसन्।

# असमराज्ये प्लवपीड़ितानाम् साहाय्यार्थं सलमानखानेन सह

## बॉलीवुडजगतः 'रूह बाबा' अर्थात् कार्तिक आर्यनः अपि साहाय्याय अग्रे आगतः




**हिमसंस्कृतवार्ताः-जगदीशडाभी मुम्बई।** प्राप्तवार्तानुसारं जलप्लावनेन असमराज्यस्य अनेकेषु मण्डलेषु महती विनाशलीला कृता। लक्षशः जनाः अनेन प्रभाविताः अभवन्, अनेकेषां जनानां प्राणाः अपि गताः। जलाप्लावनकारणात् अद्यापि असमराज्यस्य अनेकेषां मण्डलानां स्थितिः अतीव शोचनीया वर्तते। ईदृश्यां स्थितौ राज्यस्य अन्येषाम् मण्डलानां जनाः जलाप्लावनपीडितानां साहाय्यार्थं पुरतः आगच्छन्ति। अपरञ्च, देशस्य विभिन्नराज्येभ्यः अपि जनाः केवलं राहतकार्येषु सहयोगाय असमराज्यम् प्राप्ताः सन्ति। सम्पूर्णदेशात् प्राप्यमाणं समर्थनं दृष्ट्वा असमराज्यस्य जनाः अतीव प्रसन्नाः सन्ति। सम्भवतः प्रथमवारम् अन्यराज्यानां जनाः असमराज्यस्य जलाप्लावनसमस्यायाम् एतावत् ध्यानं दत्तवन्तः। अस्मिन् वारे असमराज्यस्य साहाय्यार्थं बॉलिवुड- अभिनेतारः अपि अग्रे आगताः सन्ति। वार्तानुसारं सलमान खानः स्वस्य गैर- सरकारी- संस्थायाः माध्यमेन असमराज्यस्य जलाप्लावनपीडितानां साहाय्यं करोति। अपरञ्च, अधुना बॉलीवुड-जगतः 'रूहबाबा' अर्थात् कार्तिक आर्यणः अपि साहाय्यार्थं पुरतः आगतः। सः केनचित् अपि प्रकारेण प्रचारं विना असमराज्यस्य जलाप्लावनपीडितेभ्यः एककोटि- रूप्यकाणां दानम् अकरोत्। दानकरणस्य अनन्तरं कार्तिकः सामाजिकमाध्यमेन (सोशल मीडिया) एतत् विषयीकृत्य एकम् अपि सन्देशं न प्रकाशितवान्। बॉलीवुडजगति अनेके तादृशाः अभिनेतारः सन्ति, ये दानस्य अनन्तरं सामाजिकमाध्यमे अस्य सूचनां प्रसारयन्ति। किन्तु कार्तिकः सलमानखान इव तूष्णीं साहाय्यम् अकरोत्। कार्तिकस्य अस्य योगदानस्य सूचनां जनाः असमराज्यस्य मुख्यमन्त्रिणा प्राप्नुवन्। असमराज्यस्य मुख्यमन्त्री सामाजिकमाध्यमेन (सोशलमीडिया) अलिखत्, "मुख्यमन्त्रिसहायताकोषे एककोटि-रूप्यकाणाम् उदारयोगदानाय अभिनेता- कार्तिक-आर्यनस्य हार्दिकम् आभारं व्यक्तं कृतवान्। भवतः एतेन उद्वारेण सहयोगेन वयं अतीव प्रसन्नाः स्मः। भवतः एतत् योगदानम् असमराज्यस्य जनानां साहाय्यकरणे अतीव महत्त्वपूर्णं सिद्धं भविष्यति।"

# KKSU - अगस्त-मासस्य २ दिनाङ्के रत्नागिरि-संस्कृत-उपकेन्द्रस्य पञ्चमः स्थापना-दिवस-समारोहः

## नवीनीकृत-योग-भवनस्य लोकार्पणम्, ग्रन्थ-विमोचनम्, सामञ्जस्य-सन्धिः (MoU), सहयोगी-संस्थानाम् विशिष्ट-जनानां च सम्माननम्

**हिमसंस्कृतवार्ता — डॉ रेणुका बोकारे नागपुरम्।** महाराष्ट्र-शासनेन स्थापितस्य कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालय-रामटेकस्य 'भारतरत्न-डॉ.-पाण्डुरङ्ग-वामन-काणे-संस्कृत-अध्ययन-केन्द्र-रत्नागिरि-उपकेन्द्रस्य' पञ्चमः स्थापना-दिवस-समारोहः तथा च नवीनीकृत-योग-भवनस्य लोकार्पणं रविवासरे, २ अगस्त २०२६ दिनाङ्के प्रातः १०:०० वादने अरिहन्त-मॉल-तृतीय-तले स्थिते उपकेन्द्रे आयोजितं भविष्यति। कार्यक्रमस्य प्रमुखम् आकर्षणं सर्वेषां नागरिकाणां कृते निःशुल्क-नियमित-योग-कक्षाभ्यः नवीनीकृत-योग-भवनस्य उद्घाटनं भविष्यति। अस्य प्रयासस्य रत्नागिरि-नागरिकेभ्यः नियमित-योगाभ्यासाय उत्कृष्टा सुसज्जिता च सुविधा उपलब्धा भविष्यति।

समारोहस्य अध्यक्षतां कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य प्रभारी-कुलगुरुः डॉ. अतुलवैद्यः करिष्यति। महाराष्ट्र-राज्यस्य उद्योग-मराठीभाषा-मन्त्री तथा च रत्नागिरि-मण्डलस्य पालकमन्त्री डॉ. उदयसामन्तः मुख्य-अतिथि-रूपेण उपस्थितः स्थास्यति। विशेष-अतिथि-रूपेण डॉ. केतनचौधरी, प्राचार्यः, मत्स्य-अभियान्त्रिकी-तन्त्रनिकेतन-रत्नागिरिः उपस्थितः भविष्यति। विश्वविद्यालयस्य कुलसचिवः डॉ. रोशनअलोने, संस्कृत-अन्यभाषा-सङ्कायस्य अधिष्ठात्री प्रो. कविताहोले, वेद-व्याकरण-विभागस्य अधिष्ठाता प्रो. हरेकृष्णअगस्ती तथा च परीक्षा-नियन्तकः डॉ. जयवन्तचौधरी वर्याणाम् अपि गरिमामयी उपस्थितिः भविष्यति। रत्नागिरि-उपकेन्द्रेण गतेषु पञ्चसु वर्षेषु संस्कृत-शिक्षायाः, भारतीय-ज्ञान-परम्परायाः संरक्षण-संवर्धनस्य, योग-शिक्षा-जनजागरणस्य, प्रकाशनस्य, अनुसन्धानस्य, प्रशिक्षणस्य तथा च विविधानां शैक्षणिक-सांस्कृतिक-सामाजिक-गतिविधिनां माध्यमेन उल्लेखनीय-उपलब्धयः अर्जिताः सन्ति। उपकेन्द्रस्य अस्यां सफलायां यात्रायां निरन्तरं सहयोगं यच्छतां संस्कृतप्रेमिणाम्, योग-शिक्षकाणाम्, योग-साधकानाम्, विविधानां संस्थानाम्, अधिकारिणां नागरिकाणां च योगदानस्य समारोहः विशेषं सम्माननं करिष्यति।

अस्मिन् अवसरे उपकेन्द्रस्य पञ्च-वर्षीय-उपलब्धीनां प्रस्तुतीकरणं विधास्यते। साकमेव 'कोकणातील विद्वानांचे संस्कृत साहित्यातील योगदान', 'Interdisciplinary Research in Dharmaśāstra' तथा 'सनातन धर्म' इति त्रयाणां महत्त्वात्मकानां ग्रन्थानां विमोचनम् अपि करिष्यते। समारोह-काले 'भारतरत्न-डॉ.-पाण्डुरङ्ग-वामन-काणे-संस्कृत-अध्ययन-केन्द्र-रत्नागिरि-उपकेन्द्रम्' तथा च 'श्रीमान्-भागोजी-शेठ-कीर-विधि-महाविद्यालय-रत्नागिरि' इत्यनयोः मध्ये शैक्षणिक-अनुसन्धान-सहयोगं प्रोत्साहितं कर्तुं लक्ष्येण सामञ्जस्य-सन्धि-पत्रे (MoU) हस्ताक्षराणि करिष्यन्ते। क्रमशः ५ पृष्ठे...

# स्वमूलैः अस्मान् संयोजयति कला-संस्कृतिः, तस्याः संरक्षणम् अनिवार्यम्- अधिशासिनी निर्देशिका राजश्री बनर्जी




## भारतीयशास्त्रीय-विदेशीयनृत्य-शैलीनां समन्वये प्राची- पाश्चात्ययोः अद्भुतः संगमः अन्तः सदनीय-नृत्यस्पर्धया डी.पी.एस. बोकारो-विद्यालये 'धरोहर' इति सांस्कृतिक-महोत्सवस्य समापनम्

हिमसंस्कृतवार्ताः- सौरभ दे, बोकारो। "कलायाः काचिद् सीमा नास्ति। सा सीमाः अतिक्रम्य सर्वान् एकसूत्रे बध्नाति, समाजं च समृद्धयति। अस्माकं संस्कृतिः कला च अस्मान् स्वमूलैः सह सम्बध्नीतः। अतः तयोः संरक्षणं संवर्धनं च अत्यावश्यकम्।" इति विचारान् बोकारो इस्पातसंयन्त्रस्य मानवसंसाधनविभागस्य अधिशासिनीनिर्देशिका, दिल्ली-पब्लिक- स्कूल- प्रबन्धनसमितेः च प्रो- उपाध्यक्षिका राजश्री बनर्जी महोदया अभ्यधात्। सा शुक्रवासरे डी.पी.एस. बोकारो विद्यालये आयोजितस्य चतुर्दिवसीयस्य 'धरोहर' नामकस्य सांस्कृतिकमहोत्सवस्य समापनसमारोहे मुख्यातिथित्वेन उपस्थितासीत्। महोत्सवस्य समापनम् अन्तःसदनीय-नृत्यस्पर्धया सम्पन्नम्। मुख्यातिथिः विद्यार्थिनां मनोहरप्रस्तुतीनां मुक्तकण्ठेन प्रशंसां कृत्वा विद्यालयस्य प्राचार्यं डॉ. ए. एस. गंगवार-महोदयं समग्रं विद्यालयपरिवारं च अभिनन्दितवती। तया उक्तम् यत् एते कार्यक्रमाः कला-संस्कृतेः संरक्षणे महत्त्वपूर्णं योगदानं कुर्वन्ति। विद्यालयः भविष्यनिर्माणस्य दृढः आधारस्तम्भः अस्ति; अतः विद्यार्थिनः उपलब्धान् अवसरान् सम्यगुपयुज्य स्वप्रतिभां विकसितुं प्रयतन्ताम्। केवलं परीक्षासु उच्चाङ्कप्राप्तिरेव जीवनस्य लक्ष्यं न भवेत्, अपितु आनन्दपूर्णं तनावमुक्तं च जीवनं यापनीयम्। तस्मिन् कला- संगीतयोः महत्त्वपूर्णं स्थानम् अस्ति।

ततः पूर्वं मुख्यातिथिना प्राचार्येण वरिष्ठशिक्षकैश्च सह मङ्गलदीपप्रज्वालनेन समारोहस्य शुभारम्भः कृतः। विद्यालयस्य प्राचार्यः डॉ. ए. एस. गंगवार- महोदयः अवदत् यत् 'धरोहर' महोत्सवः विद्यार्थिनः स्वसंस्कृतेः मूलैः सम्बद्धान् धारयन् तेषां वैश्विकदृष्टिकोणस्य अपि विकासं कृतवान्। विद्यालयः विद्यार्थिनां समग्रविकासार्थं तेषां सुप्तकलात्मकप्रतिभायाः, अनुशासनस्य, वैचारिकविस्तारस्य च पूर्णावकाशं प्रददाति। अस्मिन् प्रसङ्गे प्राचार्येण मुख्यातिथेः शालोपवेशनेन स्मृतिचिह्नप्रदानेन च सम्मानः कृतः। अद्वितीयायाम् अन्तःसदनीय-नृत्यस्पर्धायां विद्यार्थिभिः भारतीय- शास्त्रीय- नृत्यकलायाः विश्वस्य विविधदेशीय-पारम्परिक- नृत्यशैलीभिः सह मनोहरः समन्वयः प्रदर्शितः। एषः प्राची-पाश्चात्ययोः नृत्यपरम्परयोः विलक्षणः संगमः प्रेक्षकान् निर्णायकान् च समानरूपेण मोहितवान्। सम्पूर्णः परिसरः करतालध्वनिभिः निनादितः।

कार्यक्रमस्य प्रारम्भः गङ्गा-सदनस्य विद्यार्थिभिः अभवत्। तैः केरलस्य प्रसिद्धं कथकली-नृत्यं चीनदेशस्य 'फैन-डान्स' इति नृत्यशैल्या सह समन्वितं प्रदर्शितम्। ततः चेनाब-सदनस्य विद्यार्थिभिः उत्तरभारतीय-शास्त्रीय-'कत्थक'-नृत्यं अमेरिकादेशीय-'साल्सा'-नृत्येन सह सुमधुररूपेण प्रस्तुतम्। जमुना-सदनस्य दलं मणिपुरी-नृत्यं रूसदेशस्य 'कालिन्का'-नृत्येन सह संयोज्य अभिनवां कलात्मकाभिव्यक्तिं सृष्टवत्। सतलज- सदनस्य विद्यार्थिभिः मोहिनीअट्टम् नृत्यं नेपालदेशीय- 'मारुनी' नृत्येन सह संयोज्य दर्शकानां प्रशंसां प्राप्तवती। रावी-सदनस्य बालकाः भरतनाट्यम् श्रीलङ्कादेशीय 'काण्ड्यन' नृत्येन सह तन्मयतया प्रस्तुतवन्तः। अन्ते झेलम- सदनस्य विद्यार्थिभिः ओडिसी-नृत्यं स्पेनदेशीय- 'फ्लेमेंको' नृत्येन सह मनोहररूपेण प्रस्तुत्य कार्यक्रमस्य शोभां द्विगुणितवती।

### जमुना-चेनाब-सदनयोः संयुक्तविजयः-

विविधमूल्याङ्कनमानदण्डानां आधारेण स्पर्धायां जमुनासदनं चेनाबसदनं च संयुक्तरूपेण प्रथमस्थानं प्राप्तवन्तौ। गङ्गा-सतलजसदने संयुक्तरूपेण द्वितीयस्थानं, झेलम-रावी-सदने च संयुक्तरूपेण तृतीयस्थानं प्राप्तवन्तौ। निर्णायकमण्डल्यां नीलमसिंह- महोदया, प्रतिभासिंह-महोदया, प्रीतिमिश्रा-महोदया च समाविष्टाः आसन्।

अस्य सांस्कृतिकसप्ताहस्य अन्तर्गतं पूर्वं सम्पन्नायां अन्तःसदनीय- समूहगान- प्रतियोगितायां सतलजसदनं प्रथमस्थानम् अलभत्। चेनाब- झेलम- सदने संयुक्तरूपेण द्वितीयस्थानं, जमुना- रावी- सदने च संयुक्तरूपेण तृतीयस्थानम् प्राप्तवन्तौ।



हिमसंस्कृतवार्ताः , ईदरधीररजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ताकार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
विमानस्थाने एकेन सुरक्षारक्षकेण यात्रिणः स्यूते प्राचीन-शतघ्नीगोलकानि प्राप्तानि।

**काव्या-** नमस्ते नन्दिनि। अहो, तानि शतघ्नीगोलकानि अतीव भयानकानि! सिंहपुरे एका
विचित्रा घटना दृष्टा। एकेन छात्रेण रसयन्त्रात् पाननलिका आस्वादिता, ततः सा पुनः तत्रैव स्थापिता। तेन सः छात्रः आरक्षकैः दण्डितः।

**नन्दिनी-** कियत् मूर्खतापूर्णं तत् कार्यम्! सः दण्डम् एव अर्हति। रथ्यायाम् एका नूतना वृत्तिः आरब्धा। तत्र एकाकिभिः जनैः पचनसहायाः भाटकेन स्वीकृताः। तैः सहायैः सह केवलं मांसभोजनं खादितं, हास्यकथाः च श्रुताः।

**काव्या-** एतत् तु अतीव रोचकम् अस्ति। भाटकेन मित्राणि! अन्या एका आश्चर्यकरी वार्ता मया श्रुता। एका द्व्यशीतिवर्षीया वृद्धा स्नानद्रोण्यां पतिता। सा नवदिनानि यावत् तत्रैव बद्धा जाता। तया जलं पीतम्, स्वप्राणाः च रक्षिताः। नवदिनानन्तरं सा अन्यैः रक्षिता।

**नन्दिनी-** अहो, तस्याः वृद्धायाः धैर्यं प्रशंसनीयम् एव। इदानीं ग्रीष्मकालः अतीव उष्णः। जन्तुशालायां श्वेतभल्लूकेभ्यः विशाल-हिमखण्डाः दत्ताः। तान् दृष्ट्वा भल्लूकैः तेषु हिमखण्डेषु आनन्देन क्रीडितम्।



# लौकिकन्यायकोशः

## अन्धचटकन्यायः

एकस्य अन्धस्य हस्ते दैववशात् एकः चटकः आगतः। तेन सः आक्रोशं कर्तुम् आरब्धवान् 'अहं चटकं गृहीतवान् अहं चटकं गृहीतवान् इति।

एवम् अज्ञः मनुष्यः कथञ्चिदपि जायमानानां घटनानां कर्तृत्वस्य यशः स्वयं प्राप्तुम् इच्छति। अयम् अहंकारस्य प्रकारः खलु।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे, महाराष्ट्रम्**

**KKSU**- कार्ये उपकेन्द्राय निरन्तरं सहयोगं प्रयच्छताम् डॉ. कल्पनाआठल्ये, डॉ. आशिषबर्वे, डॉ. दिनेशरसाळ, डॉ. माधवीजोशी, डॉ. शशाङ्कपाटील, डॉ. विवेकभिडे, एड. रुचीमहाजनी, श्रीप्रमोदकोनकर, श्रीश्रीकान्तराङ्गणेकर, श्रीअनन्तागाशे, श्रीप्रभातभालेकर तथा च श्रीसञ्जयघोसाळे महोदयानां सम्माननं करिष्यते। एतदतिरिच्य शासकीय-अध्यापक-महाविद्यालयः (रत्नागिरि); संस्कृतभारती (दक्षिण-रत्नागिरि); गोगटे-जोगळेकर-महाविद्यालयः (स्वायत्त, रत्नागिरि); प्राईड-इंस्टीट्यूट (जयसिंगपुर); श्रीआद्यजगद्गुरु-रामानन्दाचार्य-वेदपाठशाला (नाणीजधाम); रिगल-कॉलेज (गुहागर); रविकीर्ति-संस्कृत-अध्ययन-केन्द्रम् (सांगली); स्वामी-ब्रह्मानन्द-संस्कृत-प्रबोधिनी-तपोभूमिः (कुंडई, गोवा); कै. गोविंद-कृष्ण-रानडे-संस्कृत-पाठशाला (रत्नागिरि); वेदपाठशाला (रत्नागिरि); गणपतीपुळे-देवस्थानम्; पावस-संस्थानम्; स्वाध्याय-परिवारः; संस्कृत-शिक्षक-सङ्घः; जिजाऊ-शैक्षणिक-सामाजिक-संस्था; अमित-अकादमी; रामानुजन-क्लासेस तथा च सुसंस्कृतम् – संस्कृत-भाषा-अध्ययन-अध्यापन-केन्द्रम् (कोल्हापुर) सदृशीनां संस्थानाम् अपि विशेषं सम्माननं करिष्यते।